योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १७९

एकोनाशीत्यधिकशततमः सर्गः १७९

श्रीवसिष्ठ उवाच ।

एवं चिन्मात्रमेवैकं शुद्धं सत्त्वं जगत्त्रयम् ।

संभवन्तीह भूतानि नाज्ञबुद्धानि कानिचित् ।। १

तस्मात्कुतः शरीरादि वस्तु सप्रतिघं कुतः ।

यदिदं दृश्यते किंचित्तदप्रतिघमाततम् ।। २

स्थितं चिद्व्योम चिद्व्योम्निशान्ते शान्तं समं स्थितम् ।

स्थितमाकाशमाकाशे ज्ञप्तिर्ज्ञप्तौ विजृम्भते ।। ३

सर्वं संविन्मयं शान्तं सत्स्वप्न इव जाग्रति ।

स्थितमप्रतिघाकारं क्वासौ सप्रतिघा स्थितिः ।। ४

क्व देहावयवाः क्वान्त्रवेष्टनी क्वास्थिपञ्जरम् ।

व्योमेवाप्रतिघं विद्धि देहं सप्रतिघोपमम् ।। ५

संवित्करौ शिरः संवित्संविदिन्द्रियवृन्दकम् ।

शान्तमप्रतिघं सर्वं न सप्रतिघमस्ति हि ।। ६

ब्रह्मव्योम्नः स्वप्नरूपस्वभावत्वाज्जगत्स्थितेः ।

इदं सर्वं संभवति सहेतुकमहेतुकम् ।। ७

न कारणं विना कार्यं भवतीत्युपपद्यते ।

यद्यथा येन निर्णीतं तत्तथा तेन लक्ष्यते ।। ८

कारणेन विना कार्यं सद्वदित्युपपद्यते ।

यथाभावितमेवार्थं संविदाप्नोत्यसंशयम् ।। ९

यथा संभवति स्वप्ने सर्वं सर्वत्र सर्वथा ।

चिन्मयत्वात्तथा जाग्रत्यस्ति सर्वात्मरूपता ।। १०

सर्वात्मनि ब्रह्मपदे नानानानात्मनि स्थिता ।

अस्त्यकारणकार्याणां सत्ता कारणजापि च ।। ११

एकः सहस्रं भवति यथा ह्येते किलैन्दवाः ।

प्रयाता भूतलक्षत्वं संकल्पजगतां गणैः ।। १२

सहस्रमेकं भवति संविदां च तथा हि यत् ।

सायुज्ये चक्रपाण्यादेः सर्गैरेकं भवेद्वपुः ।। १३

एक एव भवत्यब्धिः स्रवन्तीनां शतैरपि ।

एक एव भवेत्काल ऋतुसंवत्सरोत्करैः ।। १४

संविदाकाश एवायं देहः स्वप्न इवोदितः ।

स्वप्नाद्रिवन्निराकारः स्वानुभूतिस्फुटोऽपि च ।। १५

संवित्तिरेवानुभवात्सैवाननुभवात्मिका ।

द्रष्टृदृश्यदृशा भाति चिद्व्योमैकमतो जगत् ।। १६

वेदनावेदनात्मैकं निद्रास्वप्नसुषुप्तवत् ।

वातस्पन्दाविवाभिन्नौ चिद्व्योमेकमतो जगत् ।। १७

द्रष्टा दृश्यं दर्शनं च चिद्भानं परमार्थखम् ।

शून्यस्वप्न इवाभाति चिद्व्योमैकमतो जगत् ।। १८

जगत्त्वमसदेवेशे भ्रान्त्या प्रथमसर्गतः ।

स्वप्ने भयमिवाशेषं परिज्ञातं प्रशाम्यति ।। १९

एकस्याः संविदः स्वप्ने यथा भानमनेकधा ।

नानापदार्थरूपेण सर्गादौ गगने तथा ।। २०

बहुदीपे गृहे च्छाया बह्व्यो भान्त्येकवद्यथा ।

सर्वशक्तेस्तथैवैका भाति शक्तिरनेकधा ।। २१

यत्सीकरस्फुरणमम्बुनिधौ शिवाख्ये

व्योम्नीव वृक्षनिकरस्फुरणं स सर्गः ।

व्योम्न्येष वृक्षनिकरो व्यतिरिक्तरूपो

ब्रह्माम्बुधौ न तु मनागपि सर्गबिन्दुः ।। २२

इत्यार्षे श्रीवासिष्ठम० वा० दे० मो० नि० उ० ब्रह्म० ब्रह्ममयत्वप्रतिपादनं नामैकोनाशीत्यधिकशततमः सर्गः ।। १७९ ।।